तिलोपे तिप्यनस्तेः पा० इति पर्य्युदासादिकाराभावः । यद्वा सलिलमिति लुप्तोपमम् । सलिलमिव । यथा चीरेणाविभागापन्नं नीरं दुर्विज्ञानं तथा तमसाऽविभागापन्नं जगत् शक्यं विज्ञातुमित्यर्थः। ननु विविधविचित्र० रूपभूयसः प्रपञ्चस्य कथमतितुच्छेन तमसा चीरेण नीरस्येवाभिभवः । तथा तमोऽपि चीरवद्बलवदित्येवोच्यते । तर्हि दुर्बलस्य जगतः सर्गसमयेऽपि नोद्भवसम्भव इत्यत आह तुच्छ्येनेति । आसमन्ताद्भवतीत्याभु तुच्छ्येन । छन्दसो यकारोपजनः । तुच्छ्येन तुच्छकल्पेन सदसद्विलक्षणेन भावरूपाज्ञानेनापिहितं छादितमासीत्" भाष्यम् ।

तुज दीप्तौ चुरा० उभ० अक० सेट् इदित् । तुञ्जयति-ते अतुतुञ्जत् । तुञ्ज्यते ।

तुज प्रापणे हिंसायाञ्च भ्वा० पर० सक० बले अक० सेट् इदित् । तुञ्जति अतुञ्जीत् । तुतुञ्ज तुतुञ्जतुः । "तुञ्जे तुञ्जेय उत्तरे स्तोमाः" ऋ०१।७।७ । इमाकृचमधिकृत्य "तुञ्जतेर्दानकर्म्मणः तुञ्जे तुञ्जे दाने दाने" इति ६।१७ निरुक्तोक्तेः । दाने च ।

तुज हिंसायां भ्वा० पर० सक० सेट् । तोजति अतोजीत् । तुतोज । वेदे तुजादि० अभ्यासस्य दीर्घः । तूतुजानः । प्रेरणे च "आ वां तोके तनये तूतुजानाः" ऋ०७।६७।६ । "प्रावत्तोके तनये तूतुजाना" ७।८४।५ ।"तूतुजानाःप्रेर्य्यमाणाः"भा०।"अस्मा इत्थ प्रभया तूतुजानः" निरु०६।२० इता व्यक् ।

तुञ्ज पु० तुजि-बले अच् । वज्रे निघण्टुः ।

तुट कलहे तुद० कुटा० पर० अक० सेट् । तुटति अतुटीत् तुतोट । [च" हरिवं० २७७ अ० ।

तुटितुट पु० शिवे । "नमस्तुण्डाय तुण्डाय नमस्तुटितुटाय

तुटुम पुंस्त्री० तुट-वा०उम । उन्दुरौ त्रिका० ।

तुड भेदे तु० कुटा०पर०सक० सेट् । तुडति अतुडीत् तुतोड ।

तुड निष्पीड़ने भ्वा० आ० सक० सेट् इदित् । तुण्डते अतुण्डिष्ट । तुतुण्डे । तुण्ड्यते ।

तुड द्विधाकरणे भ्वा० पर० सक० सेट् । तोडति अतोडीत् ऋदित् । अतुतोडत्-त ।

तुडि स्त्री तुड-इन् किच्च । तोड़ने ।

तुड्ड अनादरे भ्वा० पर० सक० सेट् । तुड्डति अतुड्डीत् । अयं दोपध इत्यन्ये तन्मते क्विपि तुट्-डोपधत्वे तुड् इति भेदः ।

तुण कुटिलीकरणे तु० पर० सक० सेट् । तुणति अतोणीत् । तुतोण ।

तु(तू)णि पु० तुण+सङ्कोचे इण् बा० वृषो० । १कुणिरोगे अमरटीकायां चीरस्वामी २नन्दिवृक्षे राजनि०।"तूणीवृक्षः कटुः पाके कषायो मधुरो लघुः । तिक्तो ग्राही हिमो हृष्यो व्रणकुष्ठास्रपित्तहृत्" भावप्र० ।

तुणिक पु० तुणि-स्वार्थे क । नन्दिवृक्षे राजनि० ।

तुण्ड न० तुडि-तोड़ने अच् । १मुखे अमरः । "अयस्तुण्डैरुलूखलैः" हरिवं० २४५ अ० । "स तेन पतगेन्द्रेण पक्षतुण्डनखक्षतः" भा० आ० ३२ अ० । "दीर्घनख्या दीर्घदन्त्यो दीर्घतुण्डाश्च भारत !" भा० श० ४७ । २शिवे पु०तुटितुटशब्दे दृश्यम् । ३राक्षसभेदे । "तुण्डेन च नलस्तत्र पटुशः पनसेन च" भा० व० २८४ अ० ।

तुण्ड(ण्डि)केरी स्त्री प्रशस्तं तुण्डं(ण्डिः) कन् तद्-ईरयति ईर्त्ते वा ईर-अण् १कार्पास्याम् तस्याः फलमुखविदारे हि विस्तीर्णस्थलहेतुकार्पासोत्पत्तिः । २विम्बिकायाम् (तेलाकुचा) तस्याः फलेन हि मुखाद्ग्गोष्ठसादृश्यदानात् तथात्वम् । स्वार्थे क ह्रस्वः । तुण्ड(ण्डि)केरिकाप्यत्र अमरः । संज्ञायां कन् । विम्बिकायां राजनि० ।

तुण्डदेव पु० तुण्डरूपो देवः तुण्डेन दीव्यति दिव-अच् वा । नृपभेदे तस्य विषयो देशः ऐषुका० भक्तल् । तुण्डदेवभक्त तदीये विषये देशे पु० ।

तुण्डि पु० तुण्ड-इन् । १मुखे, २चञ्चौ च । ३विम्बिकायां, ४वन्दायां, उणा० । ५नाभौ स्त्री शब्दरत्ना० वा ङीप् । स्वार्थे कन् उक्तार्थेषु ।६तुन्दौ माधवः तुण्डिभशब्दे दृश्यम् ।

तुण्डिका स्त्री तुण्डम् तदवयवाधरसादृश्यमस्त्यस्याः ठन् । १विम्बिकायां तत्फलस्याधरावयवाधरसादृश्यात्तथात्वम् । स्वार्थे क । नाभौ शब्दरत्ना० ।

तुण्डि(ण्ड)केशी स्त्री तुण्डे (ण्डौ) मुखे कायति कै-क तुण्डि(ण्ड)कः ओष्ठः तत्र ईष्टे तत्तुल्यशोभाधारणात् ईश-अच् गौरा०ङीष् । विम्बिकायाम्(तेलाकुचा) । शब्दच० ।

तुण्डिभ(ल) त्रि० तुण्डि+भ सिध्मा० लच् वा । १तुन्दिले (भुँड़ि)युक्ते । अमरः । "तुन्दि(ण्डि) बलिवटेभः" पा०सू० । मूर्द्धन्योपधोऽयमिति माधवः । लाल्ली २मुखरे उणादि० ।

तुण्डिल पु० गर्भोपद्रावके असुरभेदे । "उपेप्रन्तमुदुम्बलं तुण्डेलमुत शालुडम्" अथ० ८।६।१७ ।